Substance, palm-leaf (Śrītāla). Size, 18⅝ × 2⅓ inches. Pages, 63. Lines, 12 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

The commentary is by Śaṅkarācārya like the preceding. This MS was written in Bahudhānya, Śrāvaṇa Bahula, on Thursday the 13th.

No. 507. तैत्तिरीयोपनिषद्भाष्यम्.

TAITTIRĪYŌPANIṢADBHĀṢYAM.

Pages, 83. Lines, 11 on a page.

Complete.

Begins on fol. 349*a* of the MS. described under No. 302.

This is like the preceding.

No. 508. तैत्तिरीयोपनिषद्व्याख्या.

TAITTIRĪYŌPANIṢADVYĀKHYĀ.

Substance, palm-leaf. Size, 16⅜ × 1⅜ inches. Pages, 46. Lines, 11 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Incomplete.

The name of the author of this commentary is not given in the work.

Beginning :

यस्मादुत्पद्यते सर्वं यस्मिन्नेव प्रलीयते ।
येनेदन्धार्यते चैव तस्मै ज्ञानात्मने नमः ॥

यैरिमे गुरुभिः पूर्वं पदवाक्यप्रमाणतः ।
व्याख्यातास्सर्ववेदान्तास्तान्नित्यं प्रणतोऽस्म्यहम् ॥

तैत्तिरीयकसारस्य मयाचार्यप्रसादतः ।
विस्पष्टार्थरुचीनां हि व्याख्येयं संप्रणीयते ॥

No. 509. तैत्तिरीयोपनिषद्भाष्यव्याख्या वनमाला.

TAITTIRĪYŌPANIṢADBHĀṢYAVYĀKHYĀ VANAMĀLĀ.

Substance, palm-leaf. Size, 18⅜ × 1½ inches. Pages, 260. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

A gloss on the commentary of Śaṅkarācārya by Acyutakṛṣṇānandatīrtha, pupil of Svayamprakāśasarasvatī.

Beginning :

विघ्नेश्वरं विघ्नशान्त्यै वाणीं वाचः प्रवृत्तये ।
गुरून् गूढार्थभानाय प्रणमामि निरन्तरम् ॥
जगन्मङ्गलरूपाय सृष्टिस्थित्यन्तकारिणे ।
नमो लक्ष्मीसमेताय कृष्णाय परमात्मने ॥

परिपूर्णं नित्यशुद्धं निर्विशेषं स्वयंप्रभम् ।
सत्यानन्दस्वरूपं यत्तदहं ब्रह्म निर्भयम् ॥
आचार्यस्य प्रसादेन पूर्वपुण्यैकजन्मना ।
तैत्तिरीयकभाष्यस्य व्याख्यां कुर्वेऽतिभक्तितः ॥

तैत्तिरीयोपानिषदं व्याचिख्यासुः भगवान्भाष्यकारः तत्प्रतिपाद्यं ब्रह्म जगज्जन्मादिकारणत्वेन तटस्थलक्षणेन सामान्येनोपलक्षितं सत्यज्ञानादिना स्वरूपलक्षणेन विशेषतो निश्चितं नमस्करोति यस्माज्जातमिति । ज्ञानात्मन इति स्वरूपलक्षणं सूचितम् ।

End:

सुवर्णज्योतिरिति । सुवर्ण इत्यत्र नकार इवार्थ इत्याशयेनाह . . . मङ्गलार्थमोङ्कामु(रो)च्चारणमिति ओमिति.

अन्नप्राणमनोबुद्धिसुखैः पञ्चभिरुज्ज्वला ।
भगवत्यर्पिता जीयाद्वनमाला कृतिर्मम ॥
नारायणपदद्वन्द्वं नारदादिभिरावृतम् ।
नमामि शतशो नित्यं नमतां मुक्तिदायिनम् ॥

Colophon:

इति श्रीस्वयंप्रकाशानन्दसरस्वतीचरणारविन्दसंलग्नरजोभूतस्य अच्युतकृष्णानन्दतीर्थस्य कृतौ तैत्तिरीयकभाष्यव्याख्यायां वनमालाख्यायां भृगुवल्लीभाष्यव्याख्या समाप्ता ॥

This MS. was copied on Sunday the 2nd of Puṣyabahula in the year Pramādi by Kōṭi Veṅkannanāyaka.

No. 510. तैत्तिरीयोपनिषद्भाष्यव्याख्या वनमाला.

TAITTIRĪYŌPANIṢADBHĀṢYAVYĀKHYĀ VANAMĀLĀ.

Substance, paper. Size, $13\frac{1}{8} \times 8\frac{1}{8}$ inches. Pages, 250. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new. To the end of Brahmavallī.

No. 511. तैत्तिरीयोपनिषद्दीपिका.

TAITTIRĪYŌPANIṢADDĪPIKĀ.

Pages, 70. Lines, 8 on a page.

Begins on fol. 7*a* of the MS. described under No. 138.

Praśnas 1 to 3; complete.

A gloss on the Upaniṣad by Śaṅkarānanda, pupil of Ānandātman.

Beginning:

सीतापतिः सर्वजगन्निदानं वाह्योपघातानखिलान्निरस्य ।
बौद्धाश्च बुद्धिप्रतिबन्धका ये बुद्धौ सदानन्दघनश्चकास्तु ॥
विश्ववन्द्यं विघ्नराजं . . . सरस्वतीम् ।
पूर्वाचार्यान् पूर्वपूज्यान् कुर्वे नतिपदं गुरून् ॥
कृष्णानन्दापूर्णचन्द्रः क्षयवृद्धिविवर्जितः ।
निष्कलो निष्कलङ्कश्च जयत्यन्तस्तमोऽपह[त]ः ॥
विद्यारण्यं भजे हृद्यं सद्योविद्योततापनम् ।
यत्सन्दर्शितमार्गेण गन्तुं मन्दधियोऽप्यलम् ॥
श्रीरामगुरुमानम्य सम्प्रदायानुसारतः ।
तैत्तिरीयोपनिषदस्तन्यते लघुर्दीपिका ॥

सेयं तैत्तिरीयोपनिषत्त्रिविधा सांहिती वारुणी याज्ञिकी चेति । तत्र प्रथम(प्र)पाठके संहिताध्यानस्योक्तत्वात्तद्रूपोपनिषत्सांहिती । द्वितीयतृतीययोः प्रपाठकयोर्या ब्रह्मविद्याभिहिता तस्यां सम्प्रदायप्रवर्तको वरुणः तस्मात्तदुभयरूपोपनिषत् वारुणी । चतुर्थप्रपाठके यज्ञोपयुक्ता अपि मन्त्रास्तत्र तत्र आम्नाताः अतः तद्रूपोपनिषद्याज्ञिकी । तासां तिसृणां मध्ये वारुणी मुख्या तस्यां परमपुरुषार्थस्य ब्रह्मप्राप्तिलक्षणस्य साक्षादेव साधनभूताया विद्यायाः प्रतिपादितत्वात् ।

* * * *

शं नो मित्र इत्यादिना अह्नश्च प्राणवृत्तेश्चाभिमानिदेवता मित्रः नः असाकं शं सुखहेतुर्भवतु । एवम् उत्तरत्रापि योज्यम् ।

End:

इदानीं श्रुतिराह । योऽधिकारी एवमुक्तप्रकारमानन्दात्मानं वेद जानाति साक्षात्करोति इत्यर्थः । सोऽपि इमान् लोकानित्यादिनोक्तं फलं प्राप्नोतीत्यभिप्रायः ॥ इत्युपनिषद्याख्यातम्(ता) पूर्ववल्ल्याम् ॥

Colophon:

इति परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यशङ्करानन्दभगवतः कृतौ तैत्तिरीयोपनिषद्दीपिकायां भृगुवल्ली नाम तृतीयः प्रपाठकः ।

No. 512. तैत्तिरीयोपनिषद्भाष्यम्.

TAITTIRĪYŌPANIṢADBHĀṢYAM.

Pages, 96. Lines, 8 on a page.

Begins on fol. 42*a* of the MS. described under No. 138.

A commentary on the Upaniṣad by Sāyaṇācārya. It forms part of his commentary on the Kṛṣṇayajurvēdāraṇyaka.

Beginning:

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
वारुण्युपनिषद्युक्ता ब्रह्मविद्या ससाधना ।
याज्ञिक्यां खिलरूपायां . . . विधीयते ॥

यथा बृहदारण्यके सप्तमाष्टमाध्यायौ खिलकाण्डत्वेनाचार्यैरुदाहृतौ तथेयं नारायणीयाख्या याज्ञिक्युपनिषदपि खिलकाण्डरूपा तल्लक्षणोपेतत्वात् । कर्मोपासनेन ब्रह्मकाण्डेषु त्रिष्वपि यद्वक्तव्यमवशिष्टं तस्य सर्वस्याभिधानेन प्रकीर्णकरूपं खिलत्वम् । बृहदारण्यके सप्तमाध्याये पूर्णमदः पूर्णमित्यादिना ब्रह्मतत्त्वमभिहितम् । ओं खं ब्रह्मेत्यादिभिरष्टमाध्यायगतैश्च यो ह वै ज्येष्ठं

श्रेष्ठं च वेदेत्यादिभिर्वाक्यैर्नानाविधान्युपासनान्युक्तानि । स यः कामयेत महान् प्राप्नुयामित्यादिना मन्थाख्यं कर्माभिहितम् । तथा पुत्रविशेषादिकामनायुक्तानां तत्कर्माण्यभिहितानि । एवमत्राप्यम्भस्य पार इत्यादिना ब्रह्मतत्त्वमभिहितम्। आदित्यो वा एष एतन्मण्डलमित्यादिनोपासनमभिहितम्। भूरग्नये पृथिव्यै स च हेत्यादिना कर्माण्यभिहितानि। तत्र कर्मणां बाहुल्यात् याज्ञिकीत्युच्यते । उपक्रमे ब्रह्मतत्त्वाभिधानादुपसंहारे च ब्रह्मज्ञानसाधनसत्त्यादीनां सन्न्यासान्तानामभिधानादुपनिषदित्युच्यते । तदीयपाठसंप्रदायस्तु देशविशेषेषु बहुविध उपलभ्यते । तत्र यद्यपि शाखाभेदः कारणं तथापि तैत्तिरीयशाखाध्यायिभिः तद्देशवासिभिः शिष्टैराद्दतत्वात्सर्वोऽपि पाठ उपादेय एव । तत्र द्रविलानां चतुःषष्ट्यनुवाकपाठः । आन्ध्राणामशीत्यनुवाकः । कर्णाटेषु केषाञ्चिच्चतुःसप्ततिपाठः । अपरेषामशीतिपाठः । तत्र वयं पाठान्तराणि यथासम्भवं सूचयन्तोऽशीतिपाठं प्राधान्येन व्याख्यास्यामः । प्रथमानुवाकस्यादौ काश्चिदृचो ब्रह्मतत्त्वं प्रतिपादयन्ति । तासु प्रथमामृचमाह । हरिः ओम् ॥ अम्भस्य पारे भुवनस्य मध्ये . . . प्रजापतिश्चरति गर्भे अन्तरिति । अम्भस्य बहुविधसमुद्रमध्यवर्तिजलस्य पारे परतीरे.

End:

तैत्तिरीयाणामुपासनामिदं किं तर्हि ब्रह्मविद्याप्रशंसा तस्यैवं विदुष इति ब्रह्मविदोऽनुक्रमणात् । तस्मान्न विद्यैक्यशङ्कायामप्यवकाशोऽस्ति। एतस्मिन्ननुवाके तत्त्वज्ञानिसेवानिमित्ताभिहितेत्यशेषमपि मङ्गलम् ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

Colophon:

इति नारायणीये चतुःषष्टितमोऽनुवाकः ।

श्रीमद्राजाधिराजराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्य-

धुरन्धरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे यजुरारण्यकं सम्पूर्णम् ॥

क्षयाब्धिवत्सरे चैत्रनवम्यां भौमवासरे ।
तेरालनारायणभट्टाख्यविदुषा लिखितं त्विदम् ॥

No. 513. तैत्तिरीयोपनिषद्भाष्यम्.

TAITTIRĪYŌPANIṢADBHĀṢYAM.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 159. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old. Complete.

The commentary is by Raṅgarāmānujamuni according to the Viśiṣṭādvaita system of the Vēdānta.

Beginning:

अतसीगुच्छसच्छायमञ्चितोरस्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥

व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि ।
तैत्तिरीयकवेदान्तविवृतिं करवाण्यहम् ॥

परविद्यामारभमाणो विघ्नशान्त्यै देवताः प्रार्थयते। शं नो मित्रश्शं वरुणः। . . . शं नो विष्णुरुरुक्रमः । सूर्यो, वरुणोऽर्य्यमाख्यादित्यविशेषः इन्द्रो बृहस्पतिः महता विक्रमाख्यपदविन्यासविशेषेण युक्तो विष्णुश्च सुखप्रदा भवन्त्वित्यर्थः ।

End:

ब्रह्म प्राप्नोति तं मार्गं वक्ष्य इत्येवार्थः। अतो योगिनो गतिचिन्ताविधानार्थोऽयं सन्दर्भ इति स्थितमित्युपनिषत् । समाप्तेति शेषः ।

क्षमाय यः करुणया क्षितिनिर्जराणां
भूमावजृम्भयत भाष्यसुधामुदारः ।

. . . . . पद्मूलयातो
रामानुजस्य मुनिराद्रियतां मदुक्तिम् ॥

Colophon:

इति रङ्गरामानुजकृतिषु तैत्तिरीयोपनिषद्भाष्यप्रकाशिका समाप्ता ॥

No. 514. तैत्तिरीयोपनिषद्व्याख्या आगमामृतम्.

TAITTIRĪYŌPANIṢADVYĀKHYĀ ĀGAMĀMṚTAM.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 9. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 48*a*. The other works herein are—Navarātrikalpaḥ (1*a*), Tripurāsiddhāntaḥ (17*a*), Vāmakēśvaratantram (20*a*), Pañcadaśībhāṣyam (31*a*), Kāmākṣīstōtram (35*a*), Sītārāmayantrōddhāraḥ (37*b*), Dēvyupaniṣad (38*a*), Pūrṇadīkṣāvidhiḥ (40*a*), Āmnāyōpaniṣad (44*a*), Bhāvanōpaniṣad (55*a*), Ṣaṭpadīstōtram (57*a*), Stōtratrayavyākhyā (58*a*).

By Sītārāma, son of Accannasūri and Vīramāmbā of Velliṅkya family in the Kauṇḍinyagōtra.

Beginning:

भञ्जनं सर्वशत्रूणां रञ्जनं जानकीमनः ।
कञ्जनं सर्वभक्तानामाञ्जनेयमहं भजे ॥
सीतारामेण विदुषा श्रीवेल्लिङ्क्यान्वयेन्दुना ।
शिक्षोपनिषद्व्याख्यानं क्रियते ह्यागमामृतम् ॥
अच्चनसूर्यध्वरिसद्गुरूणाम्
अनुग्रहात्तत्पदभक्तितश्च ।
स्वरत्यसौ मन्त्रकलाप एषः
करस्थधात्रीफलवत्स्वचित्ते ॥

पूर्वं कर्मकाण्डे तत्र तत्र शैववैष्णवगाणपतसौरशाक्तबौद्धादिमन्त्रान् क्वचित् क्वचिदुक्त्वात्र सांहितोपनिषदि प्रथमद्वितीयानुवाकयोः पञ्चदशीप्रका-

रान्(राः) कथ्यते(न्ते)। शीक्षां व्याख्यास्यामः। शिक्षैव शीक्षा सर्वजनशिक्षारूपिणी पञ्चदशी विद्येति यावत्। तां व्याख्यास्यामः तत्स्वरूपोद्धारं कुर्म इति भावः . . .

End:

शीक्षाध्याये पञ्चदशीमाह गोप्यामपि स्वयम्।
वर्णबीजद्वयं चात्र शक्तिकामस्वरद्वयम्॥
मात्रामायात्रयं चोक्तं बलं लक्ष्मीत्रयं मतम्।
साम्ना हवर्णद्वितयं सन्तानः कत्रयं मतम्॥

इति सनन्दनसंहितायाम्। एवं तत्र तत्र पञ्चसंहितासूक्तत्वादेवं व्याख्यातं नास्मद्रुचिरिति सर्वं निरवद्यम्॥

Colophon:

इति श्रीमत्षाष्टिघटिकाश्रावितसप्तकाण्डीबिरुदाङ्कितकौण्डिन्यकुलतिलकेन वीरमाम्बागर्भाम्बुधिसुधाकरेण श्रीमदच्चन्नाध्वरिसूरिसूनुना सीतारामेण कृतायां सांहितोपनिषद्व्याख्यायां प्रथमोऽनुवाकः॥

* * * *

इति संहितोपनिषद्याख्याने द्वितीयोऽनुवाकः॥

No. 515. तैत्तिरीयोपनिषल्लघुटीका.

TAITTIRĪYŌPANIṢALLAGHUṬĪKĀ.

Substance, palm-leaf (Śrītāla). Size, $14\frac{3}{4} \times 2\frac{1}{8}$ inches. Pages, 59. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, new.

Praśnas 1 to 3.

This commentary on the Upaniṣad is complete. The author's name is not herein given; but reference is made to Vidyāraṇya in a stanza added at the end of the work.

Beginning:

श्रीगुरुभ्यो नमः॥ वायुरपि नमस्क्रियते। तत्रान्तर्यामिणश्शास्त्रानुमानाभ्यां सदुपदेशगम्यत्वेन परोक्षत्वान्नास्ति संबोधनं सूत्रात्मा तु वायुरूपेण स्पर्श-

नेन्द्रियगम्यत्वात् संबोध्यते नमस्ते वायो इति। अयमेवाभिप्रायः त्वमेव प्रत्यक्षं ब्रह्मासीति वाक्येन स्पष्टीक्रियते। यतो वायूपाधिकं ब्रह्म प्रत्यक्षयोग्यं ततो हे वायो वक्ष्यमाणेषूपासकेषु त्वामेव साक्षात्कारयोग्यं ब्रह्म वदिष्यामि सोपाधिकं तु ब्रह्म येन येन प्रकारेण उपास्यते विचाराभ्यासे सति तेन तेन प्रकारेण साक्षात्कर्तुं शक्यत एव। वाजसनेयिन आमनन्ति देवो भूत्वा देवानप्येति इति।

* * * *

इति लघुटीकायां द्वादशोऽनुवाकः

* * * *

इति वारुण्यामुपनिषदि लघुटीकायां ब्रह्मवल्ल्याख्यो द्वितीयानुवाकः।

End:

अहमन्नदेवतारूपस्सन् अदन्तं दानमन्तरेण स्वयमेवान्नं भक्षयन्तं लोभयुक्तपुरुषमद्मि भक्षयामि नरकपातेन नाशयामीत्यर्थः। "केवलाघो भवति केवलादी" इति श्रुतेः। "ते त्वघं भुञ्जते पापा ये पचन्त्यात्मकारणात्" इति स्मृतेश्च। अहं विश्वं सर्वं भुवनं लोकजातमभ्यभवाम् अभिभूतवान् ईश्वररूपस्सन् प्रलयकाले संहृतवानस्मि। सुवश्शब्दः स्वर्गस्थमादित्यमुपलक्षयति। नशब्द उपमार्थः। सुवर्ण आदित्य इव आदित्यो यथा दीपादिनिरपेक्षेण स्वयमेव प्रकाशरूपः तथैवाहमपि चक्षुरादिनिरपेक्षः चैतन्यज्योतिरस्मि इत्यर्थः। अनेन साम्ना प्रतिपादितसर्वात्मकत्वानुभवः कस्य फलमित्याशङ्क्याह य एवं वेदेति। ब्रह्म पुच्छमि(ति) वाक्येनोक्तमखण्डैकरसमात्मानं यः पुमानन्नमयादिद्वारेण साक्षात्करोति तस्यैतत् फलमिति। यद्यपि स एवंविदिति फलभाक् विद्वान् पूर्वमेव निर्दिष्टः तथापि विदुष एव फलं नेतरस्य विदुषस्त्ववश्यं फलं भवत्येवेति एवंविधनियमार्थम्। य एवं वेदेति पुनराम्नातमनुवाकार्थमुपसंहरति इत्युपनिषादिति। भृगुर्वै वारुणिरित्यारभ्य य एवं वेदेत्यन्तेन ग्रन्थेन प्रतिपादिता येयं ब्रह्मविद्या सेयमितिशब्देन परामृश्यते सैव उपनिषच्छब्दवाच्या उपनिषण्णमस्यां श्रेय इत्यवयवार्थस्य विद्यायामेव संभवात् उपनिषदं भो

ब्रूहि इत्यादिवैदिकप्रयोगदृष्टेश्च । क्वचिद्ग्रन्थे तत्प्रयोगस्तु लाङ्गलं मम जीवनमित्यादिवद्गौणः । एषोपनिषत्समाप्तेति वाक्यशेषः ।

विद्यारण्यकृतव्याख्यादुग्धाब्धिं पातुमक्षमाः ।
ये तस्मादुद्धृतं सारं तृप्तिदं ते पिबन्त्वमुम् ॥

श्रीविद्यारण्यगुरुचरणाभ्यां नमः ।

No. 516. तैत्तिरीयोपनिषद्व्याख्या लघुदीपिका.

TAITTIRĪYŌPANIṢADVYĀKHYĀ LAGHUDĪPIKĀ.

Pages, 48. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 489.

Commentary on the second Praśna is complete.

Same as the last.

Beginning:

साधनं ब्रह्मविद्यायाः सांहित्यामीरितं स्फुटम् ।
वारुणोपनिषद्येतद्ब्रह्मतत्त्वं विविच्यते ॥

तत्रादौ शिष्याचार्ययोरानुकूल्यसिद्ध्यै शिष्येण जप्यं मन्त्रमाह सह नाववत्वित्यादिना । अत्र नाविति शब्देन शिष्याचार्यावुच्येते । साधनचतुष्टयसम्पन्नः ब्रह्मतत्त्वजिज्ञासुः तज्ज्ञानार्थं गुरूपसत्तिं यः करोति तादृशोऽत्र शिष्यो विवक्षितः ।

End:

य एवं वेदेत्यन्तेन ग्रन्थेन या प्रतिपादिता सेयमितिशब्देन परामृश्यते । सा चोपनिषद्रहस्यविद्या । उपनिषण्णमस्यां परं श्रेय इति व्युत्पत्तेः । तादृशी विद्या अभिहितेति शेषः ॥

Colophon:

इति वारुण्यामुपनिषदि लघुदीपिकायां ब्रह्मवल्ल्याख्यो द्वितीयोऽनुवाकः ॥

No. 517. तैत्तिरीयोपनिषद्भाष्यम्.

TAITTIRĪYŌPANIṢADBHĀṢYAM.

Pages, 27. Lines, 10 on a page.

Begins on fol. 26*b* of the MS. described under No. 31.

Praśnas 1 to 3.

A metrical commentary by Ānandatīrtha.

Beginning:

सत्यं ज्ञानमनन्तमानन्दं ब्रह्म सर्वशक्त्येकम् ।
सर्वैर्देवैरीड्यं विष्ण्वाख्यं सर्वदैमि सुप्रेष्ठम् ॥

आदित्यसंस्थिताविः(द्वि)ष्णोः श्रुत्वा ब्रह्मा य(था) हरिम् ।
तुष्टाव तत्प्रकारेण वरुणोक्तेन वै भृगुः ॥

विष्णुमस्तौत्तथा प्राह शन्नोमित्रादिका श्रुतिः ।
यदुवाच हरिस्सूर्यमण्डलस्थः परः पुमान् ॥

ब्रह्मा तदाह वरुणो(णं) वरुणे(णो) भृगवेऽपि तु ।
शन्नोमित्रादिभिर्वाक्यैस्तैरेव हरिमस्तुवत् ॥

भृगुः पञ्चात्मकं पूर्णमन्नादिमयमच्युतम् ।
मुक्तगीतावसानैस्तु स्तुतस्तेन जनार्दनः ॥

सुप्रीतः प्रददौ ज्ञानं स्वात्मभक्तिञ्च शाश्वतीम् ।
इत्यादि यजुस्संहितायाम् ।

भृगुवाक्यतया वायुनमस्कारादिकं हरिः ।
प्रोवाच ब्रह्मणे चैवं वचः सुबहुदर्शिषु ॥ इति च ।

वरणीयो वर्णः स्वरते स्वरः मात्रात् त्राणान्मात्रा बलरूपसमश्च सर्वरूपेषु सन्ततश्च ॥

वर्णादिवाचकं रूपं ज्ञेयं वर्णादिनामकम् ।
विष्णोर्वर्णादिसंस्थश्च पुंसु(स्सु) तत्तत्क्रियापदम् ॥

नारायणादिरूपाणि लोकादिषु च पञ्चसु ।
अनिरुद्धावसानानि ध्येयानि चतुरात्मना ॥
वासुदेवादिकान्येतत्तानि पूर्वोत्तरार्णयोः ।
संहितायास्तथा सङ्घः सन्धाने चाधिकृन्च्छ्रशः ॥
यो वेदैतानि रूपाणि सर्वभोगसमन्वितः ।
प्राप्नोति वैष्णवं स्थानं मुक्तः स्वर्गाभिधं परम् ॥

End:

आसमन्तात्पतित्वे च गूढं कलियुगे हरिम् ।
असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ॥
वदद्भिर्गूहितं सन्तं तृतीयोऽसुमयायति ।
येन विष्णोस्तु वर्णास्त्वान् गुणानज्ञासिषुः परान् ॥
ईशानासस्सूरयश्च निगूढान्निर्गुणोक्तिभिः ।
त्रेतायां द्वापरे चैव कलौ चित्ते क(क्र)मान्त्रयः ॥
येनैषां परमो विष्णुः नेता सर्वेश्वरेश्वरः ।
स्वयंभूर्ब्रह्मसंज्ञोऽसौ परस्मै ब्रह्मणे नमः ॥
पूर्णागण्यगुणोदारधाम्ने नित्याय वेधसे ।
अमन्दानन्दसान्द्राय प्रेयसे विष्णवे नमः ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते तैत्तिरीयोपनिषद्भाष्ये भृगुवल्ली समाप्ता ॥

No. 518. त्रिपाद्विभूतिमहानारायणोपनिषत्.

TRIPĀDVIBHŪTIMAHĀNĀRĀYAṆŌPANIṢAD.

Pages, 61. Lines, 22 on a page.

Begins on fol. 212*b* of the MS. described under No. 250.

Complete.

This Upaniṣad is also called Mahānārāyaṇōpaniṣad, and under this name a number of copies are noticed later on.

This Upaniṣad explains in accordance with the tenets of Viśiṣṭādvaita Vēdānta, the nature and qualities of Nārāyaṇa, the Supreme Being, the evolution and involution of the universe, the cause of the mundane embodied existence of souls, the means and nature of salvation; and it gives a description of Heaven with that of the Supreme Being residing therein. A table denoting the subject matter of the various chapters in the Upaniṣad is given below—

1. पादचतुष्टयस्वरूपनिरूपणम्.

2. परब्रह्मणस्साकारनिराकारस्वरूपनिरूपणम्.

3. मूलविद्याप्रलयस्वरूपनिरूपणम्.

4 महामायातीताखण्डाद्वैतपरमानन्दलक्षणपरब्रह्मणः परमतत्त्वस्वरूपनिरूपणम्.

5. संसारतरणोपायकथनद्वारा परममोक्षमार्गस्वरूपनिरूपणम्.

6. परममोक्षमार्गस्वरूपनिरूपणम्.

7. परममोक्षस्वरूपनिरूपणद्वारा त्रिपाद्विभूतिपरमवैकुण्ठमहानारायणयन्त्रस्वरूपनिरूपणम्.

8. परमसायुज्यमुक्तस्वरूपनिरूपणम्.

Beginning:

ओं भद्रं कर्णेभिरिति शान्तिः ।

अथ परमरहस्यतत्त्वं जिज्ञासुः परमेष्ठी देवमानेन सहस्रसंवत्सरं तपश्चचार । सहस्रवर्षेऽतीतेऽत्युग्रतीव्रतपसं भगवन्तं महाविष्णुं ब्रह्मा परिपृच्छति भगवन् परमतत्त्वरहस्यं मे ब्रूहीति

End:

इदं परमरहस्यं मद्भक्तेष्वभिधास्यति । मद्भक्तिनिष्ठो भूत्वा मामेव प्राप्स्यति। आवयोर्य इमं संवादमध्येष्यति स नरो ब्रह्मनिष्ठो भवति। श्रद्धावा-

ननसूयः शृणुयात् पठति वा य इमं संवादमावयोस्स पुरुषो मत्सायुज्यमेति। ततो महाविष्णुस्तिरोदधे । ततो ब्रह्मा स्वस्थानं जगामेत्युपनिषत् ।

Colophon :

इत्याथर्वणमहानारायणोपनिषदि परमसायुज्यमुक्तिस्वरूपनिरूपणं नामाष्टमोऽध्यायः ॥ त्रिपाद्विभूतिमहानारायणोपनिषत् समाप्ता ॥

No. 519. त्रिपाद्विभूतिमहानारायणोपनिषत्.

TRIPĀDVIBHŪTIMAHĀNĀRĀYAṆŌPANIṢAD.

Pages, 23. Lines, 11 on a page.

Begins on fol. 86*a* of the MS. described under No. 247.

Complete.

Same as the last.

No. 520. त्रिपुरातापनीयोपनिषत्.

TRIPURĀTĀPANĪYŌPANIṢAD.

Pages, 24. Lines, 19 on a page.

Begins on fol. 85*a* of the MS. described under No. 246.

Complete.

This Upaniṣad teaches that Śakti is the Supreme Being ; and to offer worship unto Her as such, a Mantra and a Yantra are also given herein. It concludes with an exposition of the cneness of the Sentient Principle which is conceived to form the foundation of tho universe and all its varied phenomena.

Beginning :

ओं भद्रं कर्णेभिरिति शान्तिः ।

अथैतस्मिन्नन्तरे भगवान् प्राजापत्यं वैष्णवं विलयकारणं रूपमाश्रित्य त्रिपुराभिधा भगवतीत्येवमादिशक्त्या भूर्भुवस्स्वस्त्रीणि स्वर्गभूपातालानि त्रिपुराणि हरमायात्मकेन ह्रीङ्कारेण हृल्लेखाख्या भगवती त्रिकूटावसाने निलये विलये धाम्नि महसा घोरेण व्याप्नोति सैवेयं भगवती त्रिपुरेति व्यापठ्यते ॥

तत्सवितुर्वरेणीयं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥

End:

ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः ।
पलालमिव धान्यार्थी त्यजेद्ग्रन्थमशेषतः ॥

गवामनेकवर्णानां क्षीरस्याप्येकरूपता ।
क्षीरवत्पश्यति ज्ञानं लिङ्गिनस्तु गवां यथा ॥

ज्ञाननेत्रं समाधाय स महत्परमं पदम् ।
निष्कलं निश्चलं शान्तं ब्रह्माहमिति संस्मरेत् ॥

इत्येकं परं ब्रह्मरूपं सर्वभूताधिवासं तुरीयं जानीते सोऽक्षरे परमे व्योमन्यधिवसति ।

*　　*　　*　　*

तस्मादेतान्तुर्यां श्रीकामराजीयामेकादशधा भिन्नामेकाक्षरं ब्रह्मेति यो जानीते स तुरीयं पदं प्राप्नोति । य एवं वेदेति महोपनिषत् ॥

Colophon:—त्रिपुरातापनोपनिषत्समाप्ता ॥

No. 521. त्रिपुरातापनीयोपनिषत्.

TRIPURĀTĀPANĪYŌPANIṢAD.

Pages, 9. Lines, 12 on a page.

Begins on fol. 147*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 522. त्रिपुरातापनीयोपनिषत्.

TRIPURĀTĀPANĪYŌPANIṢAD.

Substance, paper. Size, 8½ × 10⅞ inches. Pages, 20. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*b*. The other works herein are Dēvyupaniṣad (11*a*), Tripurōpaniṣad (13*a*), Bhāvanōpaniṣad (14*a*).

Complete.

Same as the last.

No. 523. त्रिपुरातापनीयोपनिषत्.

TRIPURĀTĀPANĪYŌPANIṢAD.

Pages, 20. Lines, 18 on page.

Begins on fol. 92*b* of the MS. described under No. 169.

Complete.

Same as the last.

No. 524. त्रिपुरातापिन्युपनिषत्.

TRIPURĀTĀPINYUPANIṢAD

Substance, paper. Size, 11⅝ × 7⅜ inches. Pages, 13. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains 3 Khaṇḍas.

Begins on fol. 73*a*. The other works herein are: Triśatīnāmārthaprakāśikā (1*a*), Vāmācārasiddhāntaḥ (80*b*), Bagalāmukhīsahasranāmastōtram (98*a*).

This Tripurātāpinyupaniṣad seems to be different from the Tripurātāpanīyōpaniṣad as well as from the Tripurōpaniṣad. It

however, deals with the subject that is dealt with in the former of these two latter Upaniṣads.

Beginning:

अथ श्रीविद्यामनोराम्नाय मु(उ)पदिश्यते ब्रह्मचारिणे दान्ताय गुरुभक्ताय । यथा विद्यामन(नो):कस्मिन्नुद्भव:तत्स्वरूपं ब्रूहीति होवाच । इह शृणु सौम्य ब्रह्मवाचकस्तु प्रणवो वर्तते न पुनराप्रपञ्चाधिष्ठानविद्या । स ह त्रिमात्रोपहितः । का मात्राः । अकारोकारमकाराः तत्त्वत्रयेण परिणमन्ति । तत्कथन्तत्त्वम् । तस्य भावस्तत्त्वमात्मविद्याशिवनामभिस्त्रयत्वम् अतो ह्यात्मतत्त्वमेकम् । विद्यातत्त्व मन्यत् । शिवतत्त्वम्पृथक् ।

End:

पुनः पप्रच्छ भगवन् शुद्धविद्यानामोच्चारणेन मन्त्रः कथमायातः । शृणु पुत्र तस्याः कामपि चक्रपूर्वकत्वं विना देवतात्वं कथं तस्मान्मन्त्रोपहिताश्शक्तयः घटः कलशः कुम्भ इत्येकार्थवाचक इव मन्त्रदेवतागुरुरित्येकार्थवाचकास्त एवाथ मन्त्रादि तथा सेति बुध्वा पुरुषार्थवान् भवेदिति ॥ तृतीयः खण्डः ॥

No. 525. त्रिपुरोपनिषत्.

TRIPURŌPANIṢAD.

Pages, 5. Lines, 18 on a page.

Begins on fol. 98*b* of the MS. described under No. 246.

Complete.

This Upaniṣad teaches that the worship of Śakti with the aid of the Śrīcakra and the Śrīvidyā is the means of attaining salvation. The Vāmācāra form of Śakti-worship is also adverted to incidentally with a view to censure it.

Beginning:

ओं वाङ्मे मनसीति शान्तिः ।

तिस्रः पुरस्त्रिपथा विश्वचर्षणी अत्राकथा अक्षराः सन्निविष्टाः ।
अधिष्ठायैना अजरा पुराणि महत्तरा महिमा देवतानाम् ॥

* * * *

आनन्दनं मोदनं ज्योतिरिन्दोरेता उ वै मण्डला मण्डयन्ति ।
यास्तिस्रो रेखाः सदनानि भूस्त्रीस्त्रिविष्टपास्त्रिगुणास्त्रिप्रकाराः ॥

End :

उभा दातारा विह सौभगानां समप्रधानौ समसत्वौ समादौ ।
तयोश्शक्तिरजरा विश्वयोनिः परिस्रुता हविषा भावितेन ॥
प्रसङ्कोचे गलिते वैमनस्कः शर्वस्सर्वस्य जगतो विधाता ।
धर्ता हर्ता विश्वरूपत्वमेति इयं महोपनिषत्त्रैपुर्यायाः ॥
क्षयं परमो गीर्भिरीट्टे एषर्ग्यजुः परमेतच्च साम ।
यमथर्वेयमन्या च विद्या ओं ह्रीम् ओं ह्रीमित्युपनिषत् ॥

Colophon :—त्रिपुरोपनिषत्समाप्ता ॥

No. 526. त्रिपुरोपनिषत्.

TRIPURŌPANIṢAD.

Pages, 3. Lines, 12 on a page.

Begins on fol. 152*a* of the MS. described under No. 247.
Same as the last. Complete.

No. 527. त्रिपुरोपनित्.

TRIPURŌPANIṢAD.

Pages, 3. Lines, 17 on a page.

Begins on fol. 13*a* of the MS. described under No. 522.
Same as the last. Complete.

No. 528. त्रिपुरोपनिषत्.

TRIPURŌPANIṢAD.

Pages, 2. Lines, 24 on a page.

Begins on fol. 104*a* of the MS. described under No. 160.

Complete.

No. 529. त्रिपुरोपनिषद्भाष्यम्.

TRIPURŌPANIṢADBHĀṢYAM.

Substance, paper. Size, $8\frac{1}{2} \times 6\frac{5}{8}$ inches. Pages, 61. Lines, 12 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Bhāvanōpaniṣadbhāṣyam (62*a*).

Complete.

This commentary is believed to be by a Bhāskarācārya who is the author of commentaries on certain Mantra - Śāstra works. The introduction gives an interesting account of certain forms of religious worship and ritual. He says therein that he wrote a commentary called Sētubandha on the Vāmakēśvara yantra.

Beginning:

सहस्रदलपद्मे स्वे नाथाङ्घ्रिचञ्जद्वये सति ।
कमले कमलोत्पत्तिर्न दृष्टेत्युक्तयः कथम् ॥
श्रीसाङ्ख्यायनकल्पसूत्रविधितस्तोत्राणि ये कुर्वते
येषां शाकल एव मन्त्रनिचयः कौषीतकं ब्राह्मणम् ।
तैरारण्यकमध्यमन्त्रविततिर्या पठ्यते ब्राह्मणैः
ऋग्भिष्षोडशभिर्महोपनिषदं व्याचक्ष्महे तां वयम् ॥

इह खलु त्रैवर्णिकैरध्येतव्यो वेदः पूर्वोत्तरकाण्डभेदेन द्विविधः । स उभयविधोऽपि साक्षात्परम्परया वा क्रियाविशेषविधानाय प्रवृत्तः । क्रियाश्च काश्च न(ना)देवताकाः सदेवताकाश्च – अग्निहोत्रस्नानादयो (रामकृ)ष्णोपास्तियोपिदग्न्युपास्त्याद्यश्च । अधिकारिणस्तु देहातिरिक्त आत्मा परलोकयातायातक्षमोऽ-

स्तीति विश्वासशीला एवामुष्मिकफलायासु यथाधिक्रियन्ते तथा तेष्वपि देवता नामास्मदादिभिरदृश्यमानाप्यभिमतफलदानक्षमा काचिदस्तीति विश्वासशीला एव रामकृष्णाद्युपासना(सु) अधिक्रियन्ते । ईदृशजनाभिप्रायेणैव देवतानां विग्रहादिकं समर्थितं बादरायणादिभिः । येषान्तु देवतासद्भावे जन्मान्तरकर्मवशाद् ता(वि)श्वास आस्तिकता च ते पूर्वकाण्डोत्तर(क्त)कर्मस्वेवाधिकारिणो न देवतोपासनायाम् । तादृशजनाभिप्रायेणैव देवतानां विग्रहादिपञ्चकनिरासेन कर्मप्राधान्यवादस्समर्थितो जैमिन्यादिभिः । अत एव तादृशकर्मठानामेव कर्मपरिपाकवशात् कतिपयजनानां पूजायां प्रवृत्तौ सत्यां मीमांसकमतपरित्यागप्रयुक्तोपहासकृतो वर्णिता मृगेन्द्रसंहितायाम् । ये तु देवतोपासकास्तैरपि विग्रहादिपञ्चकारन्न(ह्न)वाभिप्रायरहस्यजनैरपि कर्मप्राधान्यवादो न निरसनीयः । तथात्वे तादृशकर्मठानां चित्तपरिपाकविशेषमन्तरेण समर्थ्यमानार्थे विश्वासानुदयान्निरसनयुक्तिभिः तदवलम्बितार्थे सन्देहोदयेन तेषामुभयभ्रष्टतापत्तेः । देवताविश्वासमिव कार्याण्येव(कर्माणि) । एतदभिप्रायेणैवं

लोकसङ्ग्रहमेवापि सम्पश्यन् कर्तुमर्हसि ।

इत्यादयो विधयो

न बुद्धिभेदञ्जनयेदज्ञानां कर्मसङ्गिनाम् ।

इत्यादयो निषेधाश्च । उत्तरभूमिकाधिरूढैरपि पूर्वभूमिकासमर्थनशीलं भूमिकाया अप्रकाशनञ्चावश्यकम् । अत एव तेषां संरक्षणार्थमेवोपासकैरपि तानि कर्माणि तद्वदेव कार्यमि(र्याणी)ति तु पिण्डितोऽर्थः । तेनैतौ विधिनिषेधौ निस्त्रैगुण्ये पथि विचरतां जीवन्मुक्तानामप्यावश्यक(कावि)[र्मा]ति सिध्यति । एषान्तु बहुजन्मसु पूर्वकाण्डोक्तकर्मानुष्ठानवशात् चित्तपरिपाकविशेषो दृढो दृश्यते तादृशान् प्रति तु सम्यक् परीक्ष्य स्वीयभूमिका शनैः शनैः प्रकाशनीयैव । अन्यथा सम्प्रदायविच्छेदापत्तेः । त्रिपुरसुन्दर्युपास्तिपर्यन्ता ये भूमिकाभेदास्ते तु सविस्तरं वामकेश्वरतन्त्रव्याख्याने सेतुबन्धाख्यानेऽस्माभिः प्रदर्शिताः । उपासनाशास्त्रे तु देवताप्राधान्यमेव न कर्मणः प्राधान्यम् ।

क्रियाप्राधान्याभावादेव देवतारूपसिद्धवस्तुबोधका वेदान्ता इति वाचोयुक्तिः। देवतायाश्च त्रीणि रूपाणि स्थूलं सूक्ष्मं परञ्चेति। तत्राद्यं तत्तद्ध्यानश्लोकोक्तम्। द्वितीयं तत्तन्मन्त्रात्मकम्। तृतीयन्तु वासनात्मकम्। देवतारूपत्रैविध्यादेव तदुपास्तिरपि त्रिविधा। बहिर्यागजपान्तर्यागभेदात्। तदिदं सपरिकरं वेदपुरुषो महोपनिषद्रूपेणोपदिशति तिस्रः पुर इत्यादि स नेत्युपनिषदित्यन्तेन। अस्या उपनिषदः परदेवतास्तुतौ विनियोगः तृतीयदशममन्त्रलिङ्गात्। तत्र प्राधान्याद्देवतां निर्देष्टुमाद्यामृचमाह।

तिस्रः पुरस्त्रिपथा विश्वचर्षणी यात्रा कथाक्षरा सन्निविष्टा।
अधिष्ठायैनामजरा पुराणि महत्तरा महिमा देवतानाम्॥

मुक्तिस्तावत्पञ्चविधा सामीप्यमेकं सालोक्यसारूप्यसायुज्यत्रितयं कैवल्यञ्चेति। तास्वाद्यन्तौ प्रत्येकं द्वौ मार्गौ। मध्यमत्रयमेको मार्गः। तथा च तैत्तिरीया आमनन्ति। य एवं विद्वानुदगयने प्रमीयते। देवानामेव महिमानं गत्वादित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसस्सायुज्यं सलोकतामाप्नोत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानमिति। अयं भावः। ऊर्ध्वरेतसां स्वाश्रमोक्तकर्मानुष्ठानवतां चन्द्रलोकप्राप्तिः सामीप्यरूपा। प्रतीकोपासनया स्वस्वामिभावेनोपासनया अहंग्रहोपासनया सालोक्यादित्रितयरूपादित्यलोकप्राप्तिः। निर्गुणोपास्तिरूपब्रह्मज्ञानवतां तु कैवल्यरूपब्रह्मपदप्राप्तिः। इति एतन्मार्गत्रयमेव स्पष्टमुपबृंहितं विष्णुपुराणे तृतीयेऽंशे

उत्तरं यदगस्त्यस्य अजवीथ्याश्च दक्षिणम्।
पितृयानस्स वै पन्था वैश्वानरपथाद्बहिः॥ इत्यादिना

विवेकज्ञानदृष्टञ्च तद्विष्णोः परमम्पदम्।

इत्यन्तेन। मार्गत्रैविध्यादेव गन्तव्याः पुर्योऽपि तिस्रः ईदृशपुरत्रयप्रापकत्वात्तद्रूपत्वादेव परदेवता त्रिपुरेत्युच्यते।

End:

प्रणवस्वरूपाप्येषैवेत्याह ओमिति। ओमाङोश्चेति पररूपम्। तेनेयन्निरन्तरमध्येतव्येति भावः। इयमुपनिषदेतादृशीत्येवं यो वेद तस्य महिमानं श्रुतिरपि वक्तुमसमर्था। तस्य ब्रह्मैकरूपत्वात् तत्र वाचामप्रवृत्तेरित्याशयेन श्रुत्या मौनमास्थितम् इत्युपनिषत्।

No. 530. त्रिशिखीब्राह्मणोपनिषत्.

TRIŚIKHĪBRĀHMAṆŌPANIṢAD.

Pages, 19. Lines, 22 on a page.

Begins on fol. 181*a* of the MS. described under No. 250.

Complete.

This Upaniṣad explains the evolution of the body from primordial matter, Prakṛti, and describes the nature of the Yōga which leads the soul to self-realization.

Beginning:

ओं पूर्णमद इति शान्तिः।

त्रिशिखी ब्राह्मण आदित्यलोकं जगाम। तं गत्वोवाच भगवन् किं देहः किं प्राणः किं कारणं किमात्मा। तं होवाच सर्वमिदं शिव एव विजानीहि। किन्तु नित्यश्शुद्धो निरञ्जनो विभुरद्वयश्शिव एकस्स्वेन भासेदं सर्वं दृष्ट्वा तप्तायःपिण्डवदेकं भिन्नवदवभासते। तद्भासकं किमिति चेदुच्यते॥

End:

ग्राह्याभावे मनः प्राणो निश्चयज्ञानसंयुतः।
शुद्धसत्त्वे परे लीनो जीवस्सैन्धवपिण्डवत्॥
मोहजालकसङ्घातो विश्वं पश्यति स्वप्नवत्।
सुषुप्तिवद्यश्चरति स्वभावपरिनिश्चलः॥
निर्वाणपदमाश्रित्य योगी कैवल्यमश्नुते। इत्युपनिषत्॥

Colophon:— त्रिशिखीब्राह्मणोपनिषत्समाप्ता॥

No. 531. त्रिशिखीब्राह्मणोपनिषत्.

TRIŚIKHĪBRĀHMAṆŌPANIṢAD.

Pages, 8. Lines, 11 on a page.

Begins on fol. 74*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 532. त्रिशिखीब्राह्मणोपनिषत्.

TRIŚIKHĪBRĀHMAṆŌPANIṢAD.

Pages, 6. Lines, 6 on a page.

Begins on fol. 17*b* of the MS. described under No. 116.

Complete.

The Śānti is not given; and the colophon is त्रिशिखोपनिषत्समाप्ता ॥

After a few passages in the beginning, which are not different, this MS. gives a different and shorter version of the Upaniṣad referred to under the above number.

No. 533. त्रिशिखीब्राह्मणोपनिषत्.

TRIŚIKHĪBRĀHMAṆŌPANIṢAD.

Pages, 6. Lines, 6 on a page.

Begins on fol. 61*a* of the MS. described under No. 285.

Incomplete.

After giving the first 31½ stanzas the last three are given, so that about 130 stanzas are missing in the middle.

The Śānti is not given.

No. 534. त्रिशिखीब्राह्मणोपनिषत्.

TRIŚIKHĪBRĀHMAṆŌPANIṢAD.

Substance, palm-leaf. Size, 16 × 1¾ inches. Pages, 3. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 38*a*.

Complete.

The other works herein are Daśaślōkīvyākhyā (1*a*), Vēdāntaviṣayaḥ (22*a*), Brahmasūtram (27*a*), Aparōkṣānubhūtiḥ (33*a*), Kālāgnirudrōpaniṣad (39*a*), Māṇḍūkyōpaniṣad (39*b*), Haṁsōpaniṣad (41*a*), Brahmōpaniṣad (41*b*), Vākyasudhā (42*b*).

No Śānti is mentioned.

The version of the Upaniṣad herein is the same as in the last.

No. 535. दक्षिणामूर्त्युपनिषत्.

DAKṢIṆĀMŪRTYUPANIṢAD.

Pages, 5. Lines, 21 on a page.

Begins on fol. 207*a* of the MS. described under No. 250.

Complete.

In this Upaniṣad Mārkaṇḍēya teaches that Śiva in the form of Dakṣiṇāmūrti is the Supreme Being who is to be worshipped; and five Mantras are given as aids to conduct the worship.

Beginning:

सह नाववत्विति शान्तिः । ब्रह्मावर्ते महाभाण्डीरवटमूले महासत्राय समेता महर्षयश्शौनकादयस्ते ह समित्पाणयस्तत्त्वजिज्ञासवो मार्कण्डेयं चिरजीविनमुपसमेत्य पप्रच्छुः केन त्वञ्चिरं जीवसि केन वानन्दमनुभवसीति। परमरहस्यशिवतत्त्वज्ञानेनेति स होवाच

End:

दक्षिणाभिमुखः प्रोक्तः शिवोऽसौ ब्रह्मवादिभिः ।

सर्गादिकाले भगवान् विरिञ्चिरुपास्यैनं सर्गसामर्थ्यमाप्य तुतोष वाञ्छितार्थांश्च लब्ध्वा । सोऽस्योपासको भवति य इमां परमरहस्यं शिवतत्त्वविद्यामधीते स सर्वपापेभ्यो मुक्तो भवति । य एवं वेद स कैवल्यमनुभवति । इत्युपनिषत् ॥

Colophon:—दक्षिणामूर्त्युपनिषत्समाप्ता ॥

No. 536. दक्षिणामूर्त्युपनिषत्.

DAKṢIṆĀMŪRTYUPANIṢAD.

Pages, 2. Lines, 12 on a page.

Begins on fol. 84*a* of the MS. described under No. 247.

Complete.

No. 537. दक्षिणामूर्त्युपनिषत्.

DAKṢIṆĀMŪRTYUPANIṢAD.

Substance, palm-leaf. Size, 17¾ × 1½ inches. Pages, 4. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, not old.

Begins on fol. 176*b*. The other works herein will be noted under a subsequent number.

Complete.

No Śānti is given in the beginning, but the colophon runs as follows :—

इति अथर्वणे कावषीकशाखायां परमरहस्ये शिवतत्त्वविद्योपनिपत्समाप्ता ॥

No. 538. दक्षिणामूर्त्युपनिषत्.

DAKṢIṆĀMŪRTYUPANIṢAD.

Pages, 4. Lines, 7 on a page.

Begins on fol. 41*b* of the MS. described under No. 254.

Complete.

The colophon runs as follows :—इत्याथर्वणे कौषीतकशाखायां परमरहस्यशिवतत्त्वविद्योपनिषत्समाप्ता ॥

No. 539. दत्तात्रेयोपनिषत्.

DATTĀTRĒYŌPANIṢAD.

Pages, 5. Lines, 21 on a page.

Begins on fol. 183*b* of the MS. described under No. 246.

Complete.

This Upaniṣad states and explains seven different mystic formulæ to conduct the worship and meditation of God under the name of Dattātrēya, the meaning of which name is also mentioned herein.

Beginning:

ओं भद्रं कर्णेभिरिति शान्तिः ॥

ओं सत्यक्षेत्रे ब्रह्मा नारायणं महासाम्राज्यं किं तारकं तत्रो(त्रो) ब्रूहीति । भगवन्नित्युक्तः सत्यानन्दचिदात्मकं सात्विकं मामकन्धामोपास्वेत्याह । सदा दत्तोऽहमस्मीति प्रत्येतत्संवदन्ति येन तेन संसारिणो भवन्ति

End:

अभक्ष्य[ा]भक्ष्य(क्ष)णपापैर्मुक्तो भवति । सर्वमन्त्रयोगपारीणो भवति । स एव ब्राह्मणो भवति । तस्माच्छिष्यं भक्तं प्रतिगृह्णीयात् । सोऽनन्तफलमश्नुते स जीवन्मुक्तो भवति । इत्याह भगवान्नारायणो ब्रह्माणमुपनिषत् ॥

Colophon:—दत्तात्रेयोपनिषत्समाप्ता ॥ हरिः ओम् ॥

No. 540. दत्तात्रेयोपनिषत्.

DATTĀTRĒYŌPANIṢAD.

Pages, 3. Lines, 13 on a page.

Begins on fol. 183*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 541. दर्शनोपनिषत्.
DARŚANŌPANIṢAD.

Pages, 23. Lines, 21 on a page.

Begins on fol. 129*b* of the MS. described under No. 246.

Complete.

This Upaniṣad explains in detail the eight elements which go to make up the complete practice of the Yōga; it is so named because it enables one, through Yōga, to see one's own true nature as an intelligent soul.

Beginning:

आप्यायन्त्विति शान्तिः ॥

दत्तात्रेयो महायोगी भगवान् भूतपावनः ।
चतुर्भुजो महाविष्णुर्योगसाम्राज्यदीक्षितः ॥
तस्य शिष्यो मुनिवरः साङ्कृतिर्नाम भक्तिमान् ।
भगवन् ब्रूहि मे योगं साष्टाङ्गं सप्रपञ्चकम् ॥
येन विज्ञानमात्रेण जीवन्मुक्तो भवाम्यहम् ।
साङ्कृते शृणु वक्ष्यामि योगं साष्टाङ्गदर्शनम् ॥

End:

यदा पश्यति चात्मानं केवलं परमार्थतः ।
मायामात्रं जगत् कृत्स्नं तदा भवति निर्वृतिः ॥
एवमुक्त्वा स भगवान् दत्तात्रेयो महामुनिः ।
साङ्कृते स्वस्वरूपेण सुसमस्तेति निर्भयः ॥

Colophon:—दर्शनोपनिषत् समाप्ता ॥

No. 542. दर्शनोपनिषत्.
DARŚANŌPANIṢAD.

Pages, 10. Lines, 11 on a page.

Begins on fol. 163*a* of the MS. described under No. 247.

Complete. Same as the last.

No. 543. देव्युपनिषत्.
DĒVYUPANIṢAD.

Pages, 5. Lines, 19 on a page.

Begins on fol. 96*b* of the MS. described under No. 246.

Complete.

This Upanisad teaches that Dēvī or Durgā or Śakti is the Supreme Being; Dēvī-Mantra is herein taught to be the means of conducting her worship and thereby obtaining salvation.

Beginning:

ओं भद्रं कर्णेभिरिति शान्तिः ॥

सर्वे वै देवा देवीमुपतस्थुः । कासि त्वं महादेवि । साब्रवीदहं ब्रह्मस्वरूपिणी । मत्तः प्रकृतिपुरुषात्मकं जगत् । शून्यञ्चाशून्यञ्चाहम् । आनन्दानानन्दान(व)हम् । विज्ञानाविज्ञाने अहम् । ब्रह्माब्रह्मणी वेदितव्ये । इत्याहाथर्वणी श्रुतिः ।

End:

प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठा भवति । भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युन्तरति । य एवं वेदेत्युपनिषत् ॥

Colophon.—देव्युपनिषत्समाप्ता ॥

No. 544. देव्युपनिषत्.
DĒVYUPANIṢAD.

Pages, 2. Lines, 12 on a page.

Begins on fol. 151*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 545. देव्युपनिषत्.
DĒVYUPANIṢAD.

Pages, 5. Lines, 18 on a page.

Begins on fol. 11*a* of the MS. described under No 522.

Complete.

No. 546. देव्युपनिषत्.

DĒVYUPANIṢAD.

Pages, 5. Lines, 22 on a page.

Begins on fol. 102*a* of the MS. described under No. 169.

Complete.

No. 547. देव्युपनिषत्.

DĒVYUPANIṢAD

Substance, palm-leaf. (Śrītāla). Size, $7\frac{1}{2} \times 2\frac{1}{8}$ inches. Pages, 5 Lines, 11 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 9*b*. The other works herein will be noted under a subsequent number.

Complete.

The colophon runs as follows:— इति देवी अथर्वशिरोपानिषत् समाप्तः (प्ता) ॥

No. 548. द्वयोपानिषत्.

DVAYŌPANIṢAD.

Pages, 2. Lines, 4 on a page.

Begins on fol. 42*b* of the MS. described under No. 139.

Complete.

This Upaniṣad describes the Dvaya-Mantra —श्रीमन्नारायणचरणौ शरणं प्रपद्ये श्रीमते नारायणाय नमः—and mentions the qualities to be possessed by the teacher and the pupil for the proper study of this Mantra. It is so called because it consists of two distinct sentences.

Beginning :

अथातः श्रीमद्द्वयोत्पत्तिः । वाक्यद्वयम् । षट्पदानि अर्था दश । पञ्चविंशत्यक्षराणि । पञ्चदशाक्षरं पूर्वम् । दशाक्षरं परम् । नवाक्षरः प्रथमपदे । द्वितीयतृतीयचतुर्थास्त्रिचक्षराणि । पञ्चाक्षरं पञ्चमम् । द्व्यक्षरः षष्ठः । एकाक्षरोऽथ प्रथमः । एकाक्षरो द्वितीयः । चतुर्धाक्षरस्तृतीयः ।

End :

गुरुरेव परा विद्या गुरुरेव परा गतिः ॥
यस्मात्तदुपदेष्टासौ तस्माद्गुरुतरो गुरुः ।
सकृदुच्चरितो येन तस्य संसारनाशिनी ॥
यश्च गुरुर्नारविमोचनं भवति ।
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ।
सर्वपुरुषार्थसिद्धिर्भवति य एवं वेदेत्युपनिषत् ॥

No. 549. द्वयोपनिषत्.

DVAYŌPANIṢAD.

Pages, 2. Lines, 7 on a page.

Begins on fol. 13*b* of the MS. described under No. 305.

Complete.

In this the Śānti is given as सह नाववत्विति शान्तिः ॥

No. 550. ध्यानबिन्दूपनिषत्.

DHYĀNABINDŪPANIṢAD.

Pages, 15. Lines, 21 on a page.

Begins on fol. 133*b* of the MS. described under No. 250.

Complete.

The colophon wrongly names this as तेजोबिन्दूपनिषत् .

This Upaniṣad explains how the Praṇava, Ōm, is to be used in Yōgic meditation, and then the nature of the practice of Yōga is described at some length.

Beginning:

सह नाववत्विति शान्तिः ।

यदि शैलसमं पापं विस्तीर्णं दशयोजनम् ।
भिद्यते ध्यानयोगेन नान्यो योगः कदाचन ॥
बीजाक्षरं परं विन्दुं नादं तस्योपरि स्थितम् ।
स शब्दश्चाक्षरे क्षीणे निश्शब्दं परमं पदम् ॥
अनाहतन्तु यच्छब्दं तस्य शब्दस्य यत्पद(र)म् ।
तत्परं विन्दते यस्तु स योगी छिन्नसंशयः ॥

End:

कोदण्डद्वयमध्ये तु ब्रह्मरन्ध्रेषु शक्ति च ।
स्वात्मानम्पुरुषम्पश्येन्मनस्तत्र लयङ्गतम् ॥
रत्नानि ज्योत्स्निनादन्तु विन्दुमाहेश्वरम्पदम् ।
य एवं वेद पुरुषः स कैवल्यं समश्नुते । इत्युपनिषत् ॥

Colophon:—तेजोबिन्दूपनिषत् समाप्ता.

No. **551.** ध्यानबिन्दूपनिषत्.

DHYĀNABINDŪPANIṢAD.

Pages, 5. Lines, 11 on a page.

Begins on fol. 57*b* of the MS. described under No. 247.

Complete.

The mistake in the colophon pointed out under the last number occurs in this copy also.

No. 552. ध्यानबिन्दूपनिषत्.

DHYĀNABINDŪPANIṢAD.

Pages, 2. Lines, 6 on a page.

Begins on fol. 63*a* of the MS. described under No. 285.

Complete.

No Śānti is given in the beginning but the colophon is इत्या(थ)-र्वणे ध्यानबिन्दूपनिषत्समाप्ताः(प्ता) ॥

This seems to be much abridged and does not contain as much matter as the previous copy.

No. 553. नादबिन्दूपनिषत्.

NĀDABINDŪPANIṢAD.

Pages, 7. Lines, 20 on a page.

Begins on fol. 130*b* of the MS. described under No. 250.

Complete.

This Upaniṣad explains the manner in which the meditation of the Praṇava is to be associated with a peculiar humming nasal sound called Nāda; and it describes the value of this manner of Yōgic meditation, drawing attention at the same time, to the peculiarities of the experience gone through in the course of such meditation and to the nature of the final condition in which the successful aspirant may be found as the result of his practising Yōga thus.

Beginning :

वाङ्मे मनसीति शान्तिः ।

अकारो दक्षिणः पक्ष उकारस्तूत्तरस्स्मृतः ।
मकारं पुच्छमित्याहुरर्धमात्रा तु मस्तकम् ॥
पादादिकं गुणास्तस्य शरीरं तत्त्वमुच्यते ।
धर्मोऽस्य दक्षिणं चक्षुरधर्मोऽथो परः स्मृतः ॥

भूर्लोकः पादयोस्तस्य भुवर्लोकस्तु जानुनि ।
सुवर्लोकः कटिदेशे नाभिदेशे महज्जगत् ॥

End:

दृष्टिस्स्थिरा यस्य विना सदृश्यं
वायुस्स्थिरो यस्य विना प्रयत्नम् ।
चित्तं स्थिरं यस्य विनावलम्बं
स ब्रह्म तारान्तरनादरूपः । इत्युपनिषत् ॥

Colophon:—नादबिन्दूपनिषत् समाप्ता ॥

No. 554. नादबिन्दूपनिषत्.

NĀDABINDŪPANIṢAD.

Pages, 3. Lines, 11 on a page.

Begins on fol. 56*b* of the MS. described under No. 247.

Complete. Same as the last.

No. 555. नारदपरिव्राजकोपनिषत्.

NĀRADAPARIVRĀJAKŌPANIṢAD.

Pages, 50. Lines, 21 on a page.

Begins on fol. 156*b* of the MS. described under No. 250.

Complete.

This Upaniṣad explains the division of the life of a Dvija into the various stages known as Āśramas, and specially deals with the ascetic life of Sannyāsa. It sets forth the various classes of ascetics, the manner of entering the order of Sannyāsins, the duties and the rules of conduct appertaining to that order.

Beginning:

ओं भद्रङ्कर्णेभिरिति शान्तिः ।

परिव्राट् त्रिशिखी सीता चूडा निर्वाणमण्डलम् ।
दक्षिणा शरभं स्कन्धं महानारायणं द्वयम् ॥

अथ कदाचित्परिव्राजकाभरणो नारदस्सर्वलोकसञ्चारं कुर्वन् अपूर्वपुण्यस्थलानि पुण्यतीर्थानि तीर्थीकुर्वन् अवलोक्य चित्तशुद्धिं प्राप्य निर्वैरः शान्तो दान्तः सर्वतो निर्वेदमासाद्य . . . . नरमृगकिम्पुरुषामरकिन्नराप्सरोगणान् सम्मोहयन्नागतं ब्रह्मात्मजं भगवद्भक्तं नारदमवलोक्य द्वादशवर्षसत्रयागोपस्थिताः श्रुताध्ययनसम्पन्नाः सर्वज्ञास्तपोनिष्ठापराश्च ज्ञानवैराग्यसम्पन्नाः शौनकादिमहर्षयः प्रत्युत्थानं कृत्वा नत्वा यथोचितमातिथ्यपूर्वकमुपदेशयित्वा स्वयं सर्वेऽप्युपदिष्टाः । भो भगवन् ब्रह्मपुत्र कथं मुक्त्युपायोऽस्माकं वक्तव्यमित्युक्तस्तान् स होवाच नारदः । सत्कुलभवोपनीतस्सम्यगुपनयनपूर्वकं चतुश्चत्वारिंशत्संस्कारसम्पन्नः स्वाभिमतैकगुरुसमीपे शाखाध्ययनपूर्वकं सर्वविद्याभ्यासं कृत्वा द्वादशवर्षशुश्रूषापूर्वकं ब्रह्मचर्यम् ।

End :

कथं निर्धनिकः सुखी धनवान् ज्ञानाज्ञानोभयातीतः सुखदुःखातीतः स्वयंज्योतिःप्रकाशः सर्ववेद्यः सर्वज्ञः सर्वसिद्धिदः सर्वेश्वरः सोऽहमिति तद्विष्णोः परमं पदं यत्र गत्वा न निवर्तन्ते योगिनः सूर्यो न तत्र भाति न शशाङ्कोऽपि । न स पुनरावर्तते न स पुनरावर्तते तत्कैवल्यमित्युपनिषत् ॥

Colophon :—नारदपरिव्राजकोपनिषत्समाप्ता ॥

No. **556.** नारदपरिव्राजकोपनिषत्.

NĀRADAPARIVRĀJAKŌPANIṢAD.

Pages, 19. Lines, 11 on a page.

Begins on fol. 65*a* of the MS. described under No. 247.

Complete.

No **557.** नारदपरिव्राजकोपनिषत्.

NĀRADAPARIVRĀJAKŌPANIṢAD.

Pages, 16. Lines, 14 on a page.

Begins on fol. 1*a* of the MS. described under No. 355.

Incomplete and imperfect.

No. 558. नारदपरिव्राजकोपनिषत्.

NĀRADAPARIVRĀJAKŌPANIṢAD.

Pages, 10. Lines, 5 on a page.

Begins on fol. 23*a* of the MS. described under No. 482

Another copy of the preceding.

Incomplete.

No. 559. नारदोपनिषत्.

NĀRADŌPANIṢAD.

Page, 1. Lines, 15 on a page.

Begins on fol. 31*b* of the MS. described under No. 139.

Incomplete.

Brahman herein teaches Nārada the object of wearing on the forehead a mark in the form of Viṣṇu's foot with white mud taken from hallowed places.

Beginning:

अथ प्रणिपत्य नारदो ब्रह्माणं प्रायुङ्क्त । अधीहि भगवन् मे किं पवित्राणां पवित्रं केन सुकरेणामृतत्वमेति । स होवाच साधु ते नियोगं सुलभं पवित्रं सुलभं सुकरं तद्विष्णुक्षेत्रं तत्र मृदं श्वेतमुद्धृतासीत्युद्धरेत् ।

End:

तज्जलेन श्रीबीजेन संसृज्य तत्सूक्ष्मरेखां धारयेत् । ते द्वे शाखे हंसवर्णे गायत्रीत्रिष्टुब्दैवत्ये आत्मपरमात्मदैवत्ये लक्ष्मीनारायणदैवत्ये दर्शपूर्णमासे अष्टके इष्टापूर्तक्रिये.

No. 560. नारायणतापिन्युपनिषत्.

NĀRĀYAṆATĀPINYUPANIṢAD.

Substance, palm-leaf. Size, 17¼ × 1⅜ inches. Pages, 4. Lines, 13 on a page. Character, Telugu. Condition good. Appearance, old.

Begins on fol. 22*a*. The other works herein are : Nṛsiṁhapūrvatāpinyupaniṣadbhāṣyam 1*a*, Rāmatāpinyupaniṣadvyākhyā 24*a*, Dēvīcatussaṣṭipūjāvidhānam 50*b*, Rāmatāpinyupaniṣad 53*a*, Gurustavaḥ 57*a*, Maṅgalāṣṭakam 58*a*, Śrīvidyāpuraścaraṇavidhiḥ 59*a*, Mudrālakṣaṇam 75*a*, Nṛsiṁhasahasranāmastōtram 79*a*.

Complete.

This Upaniṣad explains how the eight-syllabled Mantra—ओं नमो नारायणाय—represents Śiva and the ten Avatars of Viṣṇu ; it mentions a number of mystic formulæ connected with this Mantra and describes the Yantra or magic figure to be used in the worship that is conducted with the aid of this Mantra ; and lastly it describes the high value of the Mantra and the greatness of God conceived as Nārāyaṇa.

Beginning :

अथ ब्रह्माणम्भगवन्तं सनत्कुमारः पप्रच्छ कीदृशन्नारायणाष्टाक्षरं भवतीति । व्याचष्टे । अथ यो वै नारायणस्स भगवान् परब्रह्म स्वमानन्दो भवति । सच्चिदानन्दस्वरूपवस्तु भवति ।

End :

सर्वक्रतुफलं प्राप्नोति । सर्वकर्मकर्ता भवति । चतुस्समुद्रपर्यन्तभूदानफलं प्राप्नोति । द्विजोत्तमो भवति । चतुर्वर्गफलं प्राप्नोति । ब्रह्मचारी ज्ञानवान् भवति । गृही पुत्रपौत्रमहदैश्वर्यवान् भवति । सन्न्यासी मोक्षवान् भवति ।

पठनाच्छ्रवणाद्वापि सर्वकामानवाप्नुयात् ।
नारायणप्रसादेन वैकुण्ठपदमश्नुते ॥

इति स होवाच भगवान् य एवं वेदेत्युपनिषत् ॥

Colophon :

इत्याथर्वणरहस्ये नारायणोत्तरतापिनीये तृतीयः खण्डः ।

वेदाक्षराणि यावन्ति पठितानि द्विजोत्तमैः ।
तावन्ति हरिनामानि कीर्तितानि न संशयः ॥
नारायण हरे कृष्ण वासुदेव जगद्गुरो ।
मुकुन्दाच्युत देवेश महाविष्णो नमोऽस्तु ते ॥
सह नाववतु शान्तिः ॥
भूतानि तक्ष(क्षर)संज्ञानि कूटस्थोऽक्षरसंवदेत् (ज्ञक.) ।
उत्तमोऽन्योऽसौ पुरुषो नारायणा(णोऽ)भिधीयते ॥

No. 561. नारायणोपनिषत्.

NĀRĀYAṆŌPANIṢAD.

Pages, 3. Lines, 23 on a page.

Begins on fol. 17*a* of the MS. described under No. 250.

Complete.

This Upaniṣad teaches that the universe proceeds from and returns unto Nārāyaṇa, that He is the universe and that the eight-syllabled Mantra—ओं नमो नारायणाय—is the means of worshipping Him and thus winning salvation.

Beginning :

सह नाववत्विति शान्तिः ।

ओम् । अथ पुरुषो ह वै नारायणोऽकामयत । प्रजास्सृजेयेति । नारायणात्प्राणो जायते । मनस्सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी । नारायणाद्ब्रह्मा जायते । नारायणाद्रुद्रो जायते । नारायणादिन्द्रो जायते । नारायणात् प्रजापतिः प्रजायते । नारायणात् द्वादशादित्या रुद्रा वसवस्सर्वाणि छन्दांसि

End:

प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायमधीयानो दिवसकृतं पापं नाशयति। तत् सायं प्रातरधीयानः पापोऽपापो भवति । माध्यन्दिनमादित्याभिमुखोऽधीयानः पञ्चमहापातकोपपातकात् प्रमुच्यते । सर्ववेदपारायणपुण्यं लभते । नारायणसायुज्यमवाप्नोति । श्रीमन्नारायणसायुज्यमवाप्नुयात् । य एवं वेदेत्युपनिषत् ॥

Colophon :—नारायणोपनिषत् समाप्ता ॥

No. 562. नारायणोपनिषत्.

NĀRĀYAṆŌPANIṢAD.

Pages, 2. Lines, 11 on a page.

Begins on fol. 8*a* of the MS. described under No 247.

Complete.

No. 563. नारायणोपनिषत्.

NĀRĀYAṆŌPANIṢAD.

Pages, 3. Lines, 14 on a page.

Begins on fol. 224*a* of the MS. described under No. 58.

Complete.

This is seen here transcribed at the end of the Chāndōgyōpaniṣad, and therefore it may belong to the Sāmavēda; but the Śānti, though not found in this MS., shows that it is probably of Yajurvēdic origin.

No. 564. नारायणोपनिषत्.

NĀRĀYAṆŌPANIṢAD.

Pages, 4. Lines, 5 on a page.

Begins on fol. 39*a* of the MS. described under No. 139.

Complete.

No. 565. नारायणोपनिषत्.

NĀRĀYAṆŌPANIṢAD.

Pages 2. Lines, 7 on a page.

Begins on fol. 45*a* of the MS. described under No. 254.
Complete.

No. 566. नारायणोपनिषत्.

NĀRĀYAṆŌPANIṢAD.

Pages, 2. Lines, 7 on a page.

Begins on fol. 13*a* of the MS. described under No. 284.
Complete.

There is another copy of the same work herein, beginning on fol. 41*b* and extending over three pages of five lines to a page.

No. 567. नारायणोपनिषत्.

NĀRĀYAṆŌPANIṢAD.

Pages, 3. Lines, 6 on a page.

Begins on fol. 125*a* of the MS. described under No. 204.
Complete.

No. 568. नारायणोपनिषत्.

NĀRĀYAṆŌPANIṢAD.

Pages, 3. Lines, 7 on a page.

Begins on fol. 116*a* of the MS. described under No. 365.
Complete.

No. 569. नारायणोपनिषत्.

NĀRĀYAṆŌPANIṢAD.

Pages, 2. Lines, 7 on a page.

Begins on fol. 73*a* of the MS. described under No. 256.
Complete.

No. 570. निरालम्बोपनिषत्.

NIRĀLAMBŌPANIṢAD.

Pages, 6. Lines, 20 on a page.

Begins on fol. 98*a* of the MS. described under No. 250.

Complete.

In the way of answering a series of questions, this Upaniṣad sets forth prominently the Advaita system of the Vēdānta philosophy.

Beginning:

पूर्णमद इति शान्तिः ।

एषामज्ञानजन्तूनां समस्तारिष्टशान्तये ।
यद्यद्बोद्धव्यमखिलं तदाशङ्क्य ब्रवीम्यहम् ॥

किं ब्रह्म क ईश्वरः को जीवः का प्रकृतिः कः परमात्मा को ब्रह्मा को विष्णुः को रुद्रः क इन्द्रः कश्शमनः कस्सूर्यः कश्शब्दः के सुराः के असुराः के पिशाचाः के मनुष्याः काः स्त्रियः के पश्वादयः किं स्थावरं के ब्राह्मणादयः ॥

End:

निरालम्बोपनिषदं योऽधीते गुर्वनुग्रहतस्सोऽग्निपूतो भवति स वायुपूतो भवति न स पुनरावर्तते न स पुनरावर्तते पुनर्नाभिजायते पुनर्नाभिजायत इत्युपनिषत् ।

Colophon:— निरालम्बोपनिषत् समाप्ता ॥

No. 571. निरालम्बोपनिषत्.

NIRĀLAMBŌPANIṢAD.

Pages, 3. Lines, 11 on a page.

Begins on fol. 43*b* of the MS. described under No. 247.

Complete.

No. 572. निरालम्बोपनिषत्.

NIRĀLAMBŌPANIṢAD.

Pages, 17. Lines, 5 on a page.

Begins on fol. 49*a* of the MS. described under No. 217.

Complete.

No. 573. निरालम्बोपनिषत्.

NIRĀLAMBŌPANIṢAD.

Pages, 6. Lines, 6 on a page.

Begins on fol. 19*a* of the MS. described under No 292.

Complete.

No. 574. निरालम्बोपनिषत्.

NIRĀLAMBŌPANIṢAD.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 5. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Begins on fol. 1*a*. The other works herein are Rājayōgāmṛta (3*a*), Gītāsāra (5*a*).

Another copy; but the following is found in addition before what happens to be the first verse in the preceding copies.

एकपीठं जगत्सर्वमेका मुद्रा च खेचरी ।
एक एव महामन्त्रः गुरुरित्यक्षरद्वयम् ॥
सर्वमन्त्रस्वरूपाय निर्गुणाय गुणात्मने ।
तच्छब्दमखिलं धात्रे तस्मै श्रीगुरवे नमः ॥
पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनम् ।
स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः ॥

निर्मलस्य कुतः स्नानं वस्त्रं दिग्वाससः कुतः ।
निर्लेपस्य कुतो गन्धो रम्यस्याभरणं कुतः ॥
निरालम्बस्योपवीतं पुष्पं निर्वासनस्य च ।
निर्गन्धस्य कुतो धूपः स्वप्रकाशस्य दीपकम् ॥
नित्यतृप्तस्य नैवेद्यं ताम्बूलं च कथं विभोः ।
स्वयंप्रकाशमानस्य कुतो नीराजनाविधिः ॥
प्रदक्षिणमनन्तस्य ह्यद्वितीयस्य का स्तुतिः ।
अन्तर्बहिश्च पूर्णस्य कथमुद्वासनम्भवेत् ॥
इयमेव परा पूजा सर्वावस्थासु सर्वदा ।
प्रेमबुद्ध्या सुसर्वेशे मनो देवे निवेदयेत् ॥

एषामज्ञानजीवानां . . . . .

No. 575. निर्वाणोपनिषत्.

NIRVĀṆŌPANIṢAD.

Pages, 3. Lines, 22 on a page.

Begins on fol. 200*a* of the MS. described under No. 250.

Complete.

This Upaniṣad describes the peculiar characteristics of the condition of Mōkṣa, wherein the liberated soul is conceived to be fully free from material bondage and all its sorrows and limitations.

Beginning:

ओं वाङ्मे मनसीति शान्तिः ।

अथ निर्वाणोपनिषदं व्याख्यास्यामः । परमहंससोऽहम् । परिव्राजकाः पश्चिमलिङ्गाः । मन्मथक्षेत्रपालाः गगनसिद्धान्तम् । अमृतकल्लोलनदी अक्षयं निरञ्जनम् । निस्संशय ऋषिः निर्वाणो देवता निष्कलप्रवृत्तिः ।

End:

परं ब्रह्म प्लववदाचरणं ब्रह्मचर्यशान्तिसंग्रहणं ब्रह्मचर्याश्रमेऽधीत्य वानप्रस्थाश्रमेऽधीत्य । स सर्वचिन्न्यासं सन्न्यासमन्ते ब्रह्माखण्डाकारं नित्यं सर्वसन्देहनाशनमेतन्निर्वाणदर्शनम् । शिष्यं पुत्रं विना न देयमित्युपनिषत् ॥

Colophon:—निर्वाणोपनिषत् समाप्ता ॥

No. 576. निर्वाणोपनिषत्.

NIRVĀṆŌPANIṢAD.

Pages, 2. Lines, 10 on a page.

Begins on fol. 81*a* of the MS. described under No. 247.

Complete.

No. 577. नृसिंहतापिन्युपनिषत्.

NṚSIṀHATĀPINYUPANIṢAD.

Pages, 40. Lines, 20 on a page.

Begins on fol. 57*b* of the MS. described under No. 250.

Complete.

This Upaniṣad explains the great value of the Nṛsiṁhamantra of thirty-two syllables and deals with the incarnation of Viṣṇu as Nṛsiṁha or Man-Lion.

Beginning of the Pūrvatāpinī:

भद्रं कर्णेभिरिति शान्तिः ॥ आपो वा इदमासन् सलिलमेव । स प्रजापतिरेकः पुष्करपर्णे समभवत् । तस्यान्तर्मनसि कामस्समवर्तत । इदं सृजेयमिति । तस्माद्यत्पुरुषो मनसाभिगच्छति । तद्वाचा वदति । तत्कर्मणा करोति । तदेषाभ्यनूक्ता । कामस्तदग्रे समवर्तताधि । मनसो रेतः प्रथमं यदासीत् ।

End:

सदाशिवं ब्रह्माभिवन्दितं योगिध्येयं परं पदं यत्र गत्वान निवर्तन्ते योगिनः । तदेतदृचाभ्युक्तम् । तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते । विष्णोर्यत्परमं पदम् । तदों निष्कामस्य भवति तदों निष्कामस्य भवति । य एवं वेदेति महोपनिषत् ॥ पञ्चमोपनिषत् ॥

Colophon :—नृसिंहपूर्वतापिनीयोपनिषत्समाप्ता ॥

Beginning of the Uttaratāpinī:

देवा ह वै प्रजापतिमब्रुवन् अणोरणीयांसमिममात्मानमोङ्कारं नो व्याचक्ष्वेति । तथेत्योमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानमिदं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव यच्चान्यत्त्रिकालातीतम् ।

End :

ते होचुर्नमस्तुभ्यं वयन्त इति ह प्रजापतिर्देवाननुशासेति । तदेष श्लोकः ॥

ओतमोतेन जानीयादनुज्ञातारमान्तरम् ।
अनुज्ञामद्वयं लब्ध्वा उपद्रष्टारमाव्रजेत् ॥ इति ॥

नवमः खण्डः ॥

Colophon :—इति नृसिंहोत्तरतापिनीयोपनिषत्समाप्ता ॥

No. 578. नृसिंहतापिन्युपनिषत्.

NṚSIṀHATĀPINYUPANIṢAD.

